उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ॥
मानो हि मूलमर्थस्य माने म्लाने धनेन किम् ।
प्रभ्रष्टमानदर्पस्य किं धनेन किमायुषा ॥
अधमा धनमिच्छन्ति धनमानौ हि मध्यमाः ।
उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ॥"

इति गारुडे ११५ अध्यायः ॥

प्रियापराधसूचिका चेष्टा मानः । स च लघुर्मध्यमो गुरुश्चेति । अल्पापनेयो लघुः । कष्टापनेयो मध्यमः । कष्टतमापनेयो गुरुः । असाध्यस्तु रसाभासः । अपरस्त्रीदर्शनादिजन्मा लघुः । गोत्रस्खलनादिजन्मा मध्यमः । अपरस्त्रीसम्भोगदर्शनादिजन्मा गुरुः । अन्यथासिद्ध-कुतूहलाद्यपनेयो लघुः । अन्यथावादशपथाद्यपनेयो मध्यमः । चरणपातभूषणदानाद्यपनेयो गुरुः । अपरस्त्रीदर्शनादिजन्मा यथा,—

"स्वेदाम्बुभिः क्वचन पिच्छिलमङ्गभूमौ
श्यामोदरि क्वचन कण्टकितञ्च कास्ति ।
अन्यां विलोकयति भावयति प्रियेऽपि
मानः क धास्यति पदं तव तन्न विद्मः ॥"

गोत्रस्खलनादिजन्मा यथा,—

"यद्गोत्रस्खलनं तत्तु भ्रमो यदि न मन्यते ।
रोमालिव्यालसंस्पर्शं शपथं तन्वि ! कारय ॥"

अपरस्त्रीसम्भोगदर्शनादिजन्मा यथा,—

"दयितस्य निरीक्ष्य भालदेशं
चरणालक्तकपिञ्जरं सपत्न्याः ।
सुदृशो नयनस्य कोणभासः
श्रुतिसक्ताः शिखरोपमा बभूवुः ॥"

इति रसमञ्जरी ॥

ग्रहः । इति मेदिनी । ने, १५ ॥ (परिच्छेदके, त्रि । यथा, ऋग्वेदे । ७ । ८८ । ५ ।

"बृहन्तं मानं वरुण स्वधावः
सहस्रद्वारं जगमा गृहन्ते ।"

"मान्त्यस्मिन् सर्वाणि भूतानि इति मानं सर्वस्य भूतजातस्य परिच्छेदकमित्यर्थः ।" इति तद्भाष्ये सायनः ॥ पुं, मन्त्रः । यथा, ऋग्वेदे । १ । १८६ । ८ ।

"अवोचाम निवचनान्यस्मिन्मानस्य सूनुः
सहसाने अग्नौ ।"

"मीयत इति मानो मन्त्रः तस्य सूनुरग्निः मन्त्रेणोत्पद्यमानत्वात् सप्तम्यर्थे प्रथमा ।" इति तद्भाष्ये सायनः ॥ निर्माता । यथात्रैव । १० । १४४ । ५ ।

"यं ते श्येनश्चारुमवृकं पदाभरदरुणं मानमन्धसः ।"

"मानं यागद्वारा निर्मातारम् ।" इति तद्भाष्ये सायनः ॥ )

मानकं, क्ली, पुं, ( मानं वृहत्परिमाणमस्य । "शेषाद्विभाषा ।" ५ । ४ । १५४ । इति कप् । ) माणकम् । माणकचु इति भाषा ।

"कच्वी तु पिच्छिला प्रोक्ता विस्तीर्णपर्णमानके ।"

इति शब्दचन्द्रिका ॥

"स्थूलकन्दो ग्राम्यकन्दः स्थूलपद्मस्तु मानकः ।"

इति रत्नमाला ॥

अस्य गुणाः ।

"मानकं स्वादु शीतञ्च गुरु शोथहरं कटु ।"

इति राजवल्लभः ॥

अपि च ।

"मानकः स्यान्महापत्रः कथ्यते तद्गुणा अथ ।
मानकः शोथहृच्छीतः पित्तरक्तहरो लघुः ॥"

इति भावप्रकाशः ॥

( विषयोऽस्य यथा,—

"पुराणं मानकं पिष्ट्वा द्विगुणीकृततण्डुलम् ।
साधितं क्षीरतोयाभ्यामभ्यसेन पायसन्तु तत् ॥
हन्तुं वातोदरं शोथं ग्रहणीं पाण्डुतामपि ।
सिद्धो भिषग्भिराख्यातः प्रयोगोऽयं निरत्ययः ॥"

इति वैद्यकचक्रपाणिसंग्रहे उदराधिकारे ॥)

मानग्रन्थिः, पुं, (मानस्य ग्रन्थिरिव । बाधकत्वात् ।) अपराधः । इति हारावली ॥ ( मानस्य ग्रन्थिः । अभिमानबन्धनम् । यथा, छन्दोमञ्जर्याम् । ५ । ७ ।

"केशववंशजगीतिर्लोकमनोन्मादकारिणी जयति ।
गोपीमानग्रन्थेर्विमोचनी दिव्यगायनाचार्या ॥")

मानधानिका, स्त्री, कर्कटी । इति शब्दमाला ॥

माननीयं, त्रि, ( मान्यते पूज्यते इति । मान+अनीयर् । ) मान्यम् । यथा,—

"मानो मान्योऽसि दक्षेषु माननीयः सुरासुरैः ।
स्थापयामि महादेवीं मानं देहि गृहे मम ॥"

इति दुर्गोत्सवपद्धतिः ॥

मानरन्ध्रा, स्त्री, ( मानार्थं समयपरिमाणज्ञापकं रन्ध्रमस्याम् । ) ताम्री । तांबी । इति भाषा । यथा,—

"यामघोषोऽथ ताम्री स्यान्मानरन्ध्रा विकालिका ।"

इति त्रिकाण्डशेषः ॥

मानवः, पुं, ( मनोरपत्यम् मनोर्गोत्रापत्यं वा पुमान् । मनु+अण् ।) मनोरपत्यम् । मनुष्यः । इत्यमरः । २ । ६ । १ ॥ ( यथा, महाभारते । १ । ७५ । १२—१३ ।

"मनोर्वंशो मानवानां ततोऽयं प्रथितोऽभवत् ।
ब्रह्मक्षत्रादयस्तस्मान्मनोर्जातास्तु मानवाः ॥")

बालः । इति शब्दरत्नावली ॥ (मनुना प्रोक्तम् । मनु+अण् ॥ उपपुराणविशेषः । यथा, देवीभागवते । १ । ३ । १३—१४ ।

"सनत्कुमारं प्रथमं नारसिंहं ततः परम् ।
नारदीयं शिवञ्चैव दौर्वाससमनुत्तमम् ।
कापिलं मानवञ्चैव तथा चौशनसं स्मृतम् ॥")

मानवर्जितः, त्रि, ( मानेन वर्ज्जितः । ) मानरहितः । यथा, महाभारते । ३ । ४६ । ४८ ।

"तस्मात् त्वं नर्त्तनः पार्थ ! स्त्रीमध्ये मानवर्ज्जितः ।")

नीचः । इति धरणिः ॥

मानवी, स्त्री, ( मानव+स्त्रीत्वात् ङीप् ।) मनुष्यस्त्रीजातिः । तत्पर्य्यायः । मानुषी २ मानुषी ३ नारी ४ । इति शब्दरत्नावली ॥ ( यथा, नैषधे । ६ । ४१ ।

"दिवौकसं कामयते न मानवी
नवीनमश्रावि तवाननादिदम् ।" )

शासनदेवताविशेषः । इति हेमचन्द्रः ।१।४५॥ स्वायम्भुवमनुकन्या । इति महाभारतम् ॥ ( यथा, भागवते । ३ । २१ । ३ ।

"स वै देवर्षिवर्य्यस्तां मानवीं समनुव्रताम् ।")

मानवौघः, पुं, (मानवानां ओघः यस्मिन् ।) ताराविद्यायाः पीठस्य उत्तरे वायव्यादीशपर्य्यन्तं पूज्यगुरुपङ्क्तिविशेषः । यथा । तारावत्यम्बभानुमत्यम्बजयाम्बविद्याम्बमहोदर्य्यम्बसुखानन्दनाथ-परानन्दनाथपारिजातानन्दनाथकुलेश्वरानन्द-नाथविरूपाक्षानन्दनाथफेरवम्बाः पूजयेत् । एते मानवौघाः । तथा च तन्त्रे ।

"अथ तारागुरून् वक्ष्ये दृष्टादृष्टफलप्रदान् ।
ऊर्द्धकेशो व्योमकेशो नीलकण्ठो वृषध्वजः ॥
दिव्यौघाः सिद्धिदा वत्स ! सिद्धौघान् शृणु यत्नतः ।
वशिष्ठः कूर्म्मनाथश्च मीननाथो महेश्वरः ॥
हरिनाथो मानवौघान् शृणु वक्ष्यामि तद्गुरून् ।
तारावती भानुमती जयाविद्या महोदरी ॥
सुखानन्दः परानन्दः पारिजातः कुलेश्वरः ।
विरूपाक्षः फेरवी च कथितं तारिणीकुलम् ॥
आनन्दनाथशब्दान्ता गुरवः सर्व्वसिद्धिदाः ।
स्त्रियोऽपि गुरुरूपाश्च अम्बान्ताः परिकीर्त्तिताः ॥"

इति तन्त्रसारः ॥

मानव्यं, क्ली, (मानवानां समूहः इति । "ब्राह्मण-माणववाड़वाद्यत् ।" ४ । २ । ४२ । इति यत् ।) माणवसमूहः । माणवानां समूहो माणव्यं विकारसंघेति ख्यः माणवो बालः । सूक्ष्म-मध्यः इत्यमध्य इत्येके । इत्यमरटीकायां भरतः ॥ ( मनोर्गोत्रापत्यं । "मनु+गोत्रादिभ्यो यञ् ।" ४ । १ । १०५ । इत्यनेन यञ् । मनुवंशीये, त्रि ॥ )

मानसं, क्ली, ( मन एव । मनस् "प्रज्ञादिभ्यश्च ।" ५ । ४ । ३८ । इति स्वार्थे अण् ।) मनः । इत्यमरः ।१।४।३१ ॥ (यथा, मार्कण्डेये । १५ । ६१ ।

"यज्ञदानतपांसीह परत्र च न भूतये ।
भवन्ति तस्य यस्यार्त्तपरित्राणे न मानसम् ॥")

तस्य गुणा यथा,—

"परापरत्वं संख्याद्याः पञ्च वेगश्च मानसे ।"

इति भाषापरिच्छेदः ॥

( मनसि भवो जातो वा । मनस्+अण् । ) मनोभवे, त्रि । यथा, सङ्कल्पः कर्म्ममानसम् ॥ इत्यमरः । १ । ५ । २ ॥

"विषयेष्वतिसंरागो मानसो मल उच्यते ।"

इत्येकादशीतत्त्वम् ॥